Published by Janardan Sakharam Kudalkar, M. A., LL. B., Curator of State Libraries, Baroda, for the Baroda Government, and Printed by Manilal Itcharam Desai, at **The Gujarati Printing Press, No. 8, Sassoon Buildings Circle, Fort, Bombay.**

Price Re. 0-8-0

क्थि सक्थिकम्, अररि कपाटः, कशिपु ग्रासाच्छादनं, जानु जङ्घा-मध्यपर्व, कसेरु कन्दविशेषः, तोरणं भवनादीनां द्वारम्। इदं बिसं मृणालमूलम्। अर्द्धं टच्। अर्द्धात्परष्टच् यस्तदन्तशब्दः। अर्द्धं नाव इति विगृह्य "अर्द्धाच्च (५-४-१००)" इति समासान्ते टचि कृते परव-ल्लिङ्गत्वे प्राप्ते नपुंसकार्थवचनमिदम्। अर्द्धनावम्। एवमर्द्धखारमित्यत्र "खार्याः प्राचाम् (५-४-१०१)" इति टचि कृते। इदमहः दिवसः। नान्तत्वात् पुलिङ्गे प्राप्ते वचनम्।

इति नपुंसकलिङ्गं समाप्तम्।

पुलिङ्गं स्नदुदन्तोऽप्घञ्क्यन्तोऽस्यगनदाब्धिकूपानाम्। स्वर्वज्रपरशुरथमखघनघृणिरदपुष्यवलतानाम् ॥ १५ ॥

पुल्लिङ्गमधिकृतं वेदितव्यम्, आ स्त्रीलिङ्गात्। सकार-नकार-अकार-उकारान्तः शब्दः पुल्लिङ्गो भवति। सन्तः। अयमनेहाः कालः, दोर्बाहुः। नन्तः। धन्वा निर्जलो देशः, प्लीहा व्याधिविशेषः, मूर्द्धा शिरः, मज्जा षष्ठो धातुः। अकारान्तः। नगः वृक्षः पर्वतश्च, नरः, किन्नरः, पुरुषः, देवः, संचयः, चयः। उकारान्तः। तरुः वृक्षः, कारुः शिल्पी, वायुः मरुत्, सेतुः जलबन्धः, केतुः ध्वजः एवमादि। अन्तशब्दग्रहणादना-न्तोऽपि। महिमा महतो भावो, गरिमा गुरोर्भाव इति विगृह्य। अप्-घञ्क्यन्तः। अप्घञ्क्रिप्रत्ययान्तः शब्दः पुल्लिङ्गो भवति। भावेऽचिन्न-णकान्तो दन्तो हीति नपुंसकत्वे प्राप्ते अप्घञन्तयोः पुल्लिङ्गार्थं वचनम्। "ऋदोरप् (३-३-५७)"। दरः गरः प्रकरः लवः प्लवः भवः। घञन्तः। पाकस्त्यागः। अत्राप्घञ्ग्रहणं पूर्वनपुंसकलक्षणबाधनार्थम्। तेन अय-मुद्धनः यत्र काष्ठानि संस्थाप्य हन्यन्ते। "उद्घनोऽत्याधानम् (३-३-८०) इत्यपन्तो निपात्यते। "आङि युद्धे (३-३-७३)" इत्यप्। आहवः रणम्। "अपघनोऽङ्गम् (३-३-८१)" इति अपघनः हस्तः पादो वा। "मूर्त्तौ घनः (३-३-७७)" इति घन इति काठिन्यमित्यर्थः। संहननं संघातः, उपोद्घातः उद्घातः निघातः उत्पातः। मन्त्रणं मन्त्रः। निकित्यतेऽस्मिन्निति निकेतो वेश्म। अलङ्करणमलङ्कारः आभरणं, क्लेशनं क्लेशः दुःखम्। स-ङ्ग्रामः युद्धम्। आदिः निधिः विधिः आधिः उपाधिः जलधिः अब्धिः

INTRODUCTION.

The work presented to the public in the following pages is the composition of an illustrious figure in the history of Sanskrta Literature.

The present work—Lingânuśâsana deals succinctly in thirty verses of the Âryâ metre with the genders of nouns in Sanskrta. Two more verses in the Vasantatilakâ metre are added at the end by the author about the sources and himself. It is, as the author himself says at the end, based on the works of Vyâḍi, Vararuchi, and Chandra and on the Jainendra Vyâkaraṇa (of Devanandi *alias* Pûjyapâda).[1] The commentary, which clearly explains the aphoristic verses, is written by the author himself.

Lingânuśâsanas—The following is the list of the Lingânuśâsanas hitherto known.

Lingânuśâsana by Pâṇini.

Commentary by Bhaṭṭotpala.
,, by Bhaṭṭoji.
,, by Râmachandra.

,, by Vararuchi.
,, by Chandra.
,, by Vâmana.
,, by Śâkaṭâyana.
,, by Harshavardhana.
Commentary-Sarvârthalakshaṇa by Śabarasvamin.
,, by Hemachandra.
Vivaraṇa by Hemachandra.
Commentary on Vivaraṇa (Lingadurgapadaprabodha by Vallabha.)
,, by Durgâtman.

The author—The author of the Lingânuśâsana and the commentary is Vâmana. He himself has mentioned his name in the last verse.

We know of four works composed by Vâmana:—(1) Part of the Kâśikâ Vṛtti, (2) Kâvyâlankârasûtra and Vṛtti, (3) Lingânuśâsana, (4) Vidyâdhara Vyâkaraṇa, *mentioned in Vardhamâna's Gaṇaratna-*

---

1 व्याडिप्रणीतमथ वाररुचं सचान्द्रं जैनेन्द्रलक्षणगतं विविध तथान्यत् ।

प्रसवः कुसुमम्, इमौ अश्वडवौ इमे अश्ववडवाः, अश्वाश्च वडवाश्चेति द्वन्द्वे कृते परवल्लिङ्गप्राप्तिः भवति। अनुक्रान्तो वाकोऽनयाऽनेन वा नपुंसके·········वा अनुवाकः इत्यत्र "अकर्त्तरि च कारके सञ्ज्ञायाम् (३-३-१९)" इति नपुंसके घञ् कुर्वन्ति। तदुभयथा·········अयं छदः पर्णम्, अयं गरुत् पिच्छम्, अयमुचारःपुरीषं, "मातुरुचार एव सः" इति यथा·····सम्।

विंशत्याद्येकार्था स्त्रियां तु नित्यं नपुंसकेऽदन्ता।
सङ्ख्या शतादिरिष्टा द्वित्याद्यर्थे च सङ्ख्यायाम्॥ २५॥

विंशत्याद्या सङ्ख्या एकार्था भवति एकवचनान्ता प्रयुज्यते। सङ्ख्येये ··········यां च वर्तमाना। विंशत्या पुरुषैः कुटुम्बैर्वा। एवं त्रिंशत् चत्वारिंशत् पञ्चाशत् षष्टिः सप्ततिः अशीतिः नवतिः। अदन्ता शतादिसङ्ख्या नित्यं नपुंसके भवति। शतं पुरुषाः शतं स्त्रियः शतं कुलानि। एवं सहस्रम् अयुतं नियुतम्। अदन्तेति किम्?। इयं लक्षा, इयं कोटी, अयं शङ्खः सङ्ख्या। इष्टेतिग्रहणं छन्दःपूरणार्थम्। द्वित्याद्यर्थे च सङ्ख्यायाम्। विंशत्याद्या शताद्या च सङ्ख्या सङ्ख्यायां वर्त्तमाना द्वित्याद्यर्थे भवति। च शब्दादेकार्था च भवति। पुरुषाणां विंशतिः द्वे विंशती तिस्रो विंशतयः, पुरुषाणां शतं द्वे शते त्रीणि शतानि। एवमादि।

स्त्रीलिङ्गनपुंसकयोरानन्तोत्तरपदो द्विगुश्चार्चिः।
षष्ठ्यादिपदाच्छायाशालासेनासुराः सनिशाः॥ २५॥

आकारान्तमनन्तं चोत्तरपदं यस्मिन् द्विगौ स तथोक्तो द्विगुः समासः स्त्रीलिङ्गे नपुंसके च भवति। पञ्चखट्वाः समाहृताः पञ्चखट्वी पञ्चखट्वम्। "ह्रस्वो नपुंसके(१-२-४७)" इति ह्रस्वः। दशमाली दशमालम्। अनन्तोत्तरपदः। पञ्चतक्षी पञ्चतक्षम्। अत्र वचनादेव नकारलोपः। अनो नलोपश्च। शतराजी शतराजम्। अर्चिश्च स्त्रीनपुंसकयोर्भवति। इयमर्चिः इदमर्चिः। षष्ठ्यादिपदाच्छाया। षष्ठ्यन्तं पूर्वपदं यस्याश्छायायाः सा स्त्रीलिङ्गे नपुंसके च भवति। वृक्षस्य च्छाया वृक्षच्छायं वृक्षच्छाया, पर्वतच्छाया पर्वतच्छायम्। पक्षे नपुंसकत्वं विधीयते। तथा

mahodadhi composed in Samvat 1197.[1] It is to be seen whether these four works were composed by four different personages bearing the name of Vâmana or by one person, who was both a grammarian and a rhetorician.

Vâmana, the author of the Lingânusâsana, and his times.— The date of Vâmana, the author of the Lingânuśâsana, can be fixed with certainty. He is posterior to the authors of the Chândra and Jainendra grammars, as these works are utilized by him in the present work. He has quoted one line of a verse which occurs in the Śiśupâlavadha of Mâgha.[2] Mâgha was the grandson of Suprabhadeva, who was the minister of Varmalâta, king of Bhinnamâla. Varmalâta is mentioned in the Vasantgadh inscription of Samvat 682 (A. D. 625). Mâgha must have, therefore, flourished about the end of the seventh century A. D. While commenting on the phrase Râjârtha (राजार्थ) in the 9th Kârikâ of the present work, Vâmana gives Jagattungasabhâ (जगत्तुङ्गसभा) as an example of the case where the word Sabhâ (सभा) forming the second part of a compound does not become neuter as it is preceded by a word indicating the name of a king and not meaning a king. Now history tells us that the Râshtrakûta Emperor Govind III was called Jagattunga. Various grants of this king are discovered and his reign is put between 794–813 A. D.

This specification of the assembly of Jagattunga must have a special significance. It tells us not only that he was a contemporary of Jagattunga but that he must have been a member of his court. Vâmana also mentions the name of Sribhavana as a village. Śribhavana is mentioned in the [3]Vaṇi-Dindori and Râdhanpur plates of the same king as a place where he spent the rainy season with his army, while going to subdue the southern kings of Kânchî and Vengî.

Vâmana's Lingânus'âsana quoted by later writers.—Vâmana's Lingânuśâsana seems to have been an authoritative work of note, as

1 शालातुरीयशकटाङ्गजचन्द्रगोमिदिग्वस्त्रभर्तृहरिवामनभोजमुख्याः ।
मेधाविनः प्रवरदीपककर्तृयुक्ताः प्राज्ञैर्निषेवितपदद्वितया जयन्ति ।
वामनोऽविश्रान्तविद्याधरव्याकरणकर्ता । Gaṇaratnamahodadhi

2 (त्वयि भौमं गते जेतुमरौत्सीत्स पुरीमिमाम् ।)
प्रोषितार्यमणं मेरोरन्धकारस्तटीमिव ॥ II 39

3 I. E. vol. XI p.162.

वर्जयित्वा। क्षीरं पिबतीति क्षीरपाः स्त्री ना कुलं वा। एवं ग्रामणीः यवलूः। अयं काष्ठभित् कुठारः, इयं काष्ठभित् वासी, इदं काष्ठभित् करपत्रम्। आत्मंभरिः पुरुषः, आत्मंभरिः स्त्री कुटुम्बं वा, दाक्षिः पुमान् स्त्री कुलं वा। श्रीमान् पुमान्, श्रीमती स्त्री, श्रीमत् कुलं, धर्ममनाः पुमान्, स्त्री कुलं वा, शुद्धमतिः ना स्त्री कुलं वा, स ना, सा स्त्री, तत् कुलम्। द्वौ नरौ, द्वे स्त्रियौ, द्वे कुले। श्वेतः पटः, श्वेता पटी, श्वेतं वस्त्रम्। अयं सिन्धुः अब्धिः, इयं सिन्धुः, अयं गौ रश्मिः इयं गौः भूमिः, अयं किष्कुः इयं कुष्कुः वितस्तिः हस्तः, अयं करेणुः हस्ती हस्तिनी वा। शरदिति किम्?। इयं शरत् ऋतुविशेषः वर्षं च। हलन्तत्वात् स्त्रीलिङ्गमेव भवति। नित्यग्रहणं बहुलनिवृत्त्यर्थम्।

स्वत आमलकविभीतकतटभल्लातकहरीतकाख्रिषु ति(हि)।
ङ्यन्ताः स्त्रियामथान्ताः शृङ्खलसविषाणनखरवल्लूराः॥२८॥

एते आमलकादयः शब्दाः, स्वत एव नाभिधेयवशात्, त्रिष्वपि लिङ्गेषु भवन्ति। स्त्रियां ङीप्प्रत्ययान्ता भवन्ति। आमलकः आमलकी आमलकं, विभीतकः विभीतकी विभीतकं, तटः तटी तटं, भल्लातकः भल्लातकी भल्लातकं, हरीतकः हरीतकी हरीतकम्। शृङ्खलादयः शब्दाः स्त्रियामथान्ताः आकारान्ता भवन्ति। शृङ्खलः शृङ्खला शृङ्खलं, विषाणः विषाणा विषाणं, नखरः नखरा नखरं, वल्लूरः वल्लूरा वल्लूरम्।

परवल्लिङ्गं द्वन्द्वे तत्पुरुषे च द्विगौ हि वाच्यमिव।
अर्थान्ते च प्राप्तलमापन्नप्राप्तपूर्वे च ॥ २९ ॥

द्वन्द्वे समासे यत् परपदे लिङ्गं, समासेऽपि तद्भवति। इमौ मयूरीकुक्कुटौ, इमे कुक्कुटमयूर्यौ, इमे न्यग्रोधशिंशपे, इमौ शिंशपान्यग्रोधौ। तत्पुरुषे च। यत् परपदे लिङ्गं तद्वत् समासेऽपि लिङ्गं भवति। अर्द्धं पिप्पल्याः अर्द्धपिप्पली, अर्द्धहरीतकी, राजपुरुषः, राजदारिका, नीलोत्पलम्। द्विगौ हि वाच्यमिव। द्विगौ हि समासे वाच्यमिव लिङ्गं भवति। असमाहारार्थं आरम्भः। पञ्चसु कपालेषु संस्कृतः पुरोडाशः पञ्चकपालः, दशकपालः। परवल्लिङ्गत्वं प्राप्तम्। अत्र अर्थान्ते च तत्पुरुषे वाच्यमिव लिङ्गं भवति। ब्राह्मणार्थं ओदनः, ब्राह्मणार्था शिखरिणी,

it is quoted by the commentators of the AmaraKośa—Sarvânanda,[1] (1159 A D.) Kshirsvâmin,[2] and Râyamukuta.[3] Vâmana's Lingânuśasana and the Vrtti are often found quoted by Hemachandra in the Vivarana on his Lingânuśasana [4]

Authors mentioned or quoted by Vâmana —Vâmana mentions in the present work the names of Pânini, Vyâdi, Vararuchi and of the grammatical works—Chândra and Jainendra There are also quotations from the Rgveda, Mahâbhârata, Mahâbhâshya, Harshacharita and Śiśupâlavadha. Two quotations remain untraced

The geographical names mentioned in the present work.— Vâmana has mentioned in the present work a few geographical names Some of these like Kâsmîra, Konkana, Varenda (Rajashahi Dist) Tirabhukti (Tirhoot) Mâlavaka and Panchâla are countries, some like Mathurâ and Kânyakubja are cities, while Tailâvata, Śrikantha, Śribhavana, Lingâshâdhi, and Śalukini are villages

Vâmana, the author of the Kâvyâlankârasûtra —The rhetorician Vâmana has quoted in his Kâvyâlankârasutravrtti verses from

---

1 द्विगुरपि पात्राद्यन्त· (1–6) बह्वश्च समासिकता (1–89) पुल्लिङ्गस्त्रीलिङ्गा मरीचिमणियष्टिमुष्ट्योन्याणि: (1–179) रूप तल्प शिल्प समीपकूर्पोडुपान्तरीपाणि (1–482)

2 यद्वामन:–" सङ्ख्याव्ययपूर्वकश्च पथ: ।

3 " द्विगुरपि पात्राद्यन्त. क्रियाव्ययविशेषणश्चैक्ये इति वामन. ।

1st Kânda

सङ्ख्याव्ययपूर्वकश्च पथश्चेति वामन· ।

2nd Kânda

एव समाहारे क्लीबमप्यहोरात्र वामनलिङ्गानुशासने द्विगुरपि पात्राद्यन्त इति ।

4 यद्वामन·— ' विंशत्याद्यैकार्या स्त्रिया तु नित्य नपुसकेऽदन्ता ।
सङ्ख्या शतादिरिष्टा द्वित्वाद्यर्थे च सङ्ख्यायाम् ॥
दुन्दुभ्या किल तत्कृत पतितया यद्द्रौपदी हारिता ।

यद्वामन.— ' बह्वस्तु समासिकतावर्षाप्सुमनोजलौकसोऽप्सरस ।
तानि धर्माणि प्रथमान्यासन् ।

सार च तत्सङ्ग्रहश्च सारसङ्ग्रह. ।

दिग्देश. कालो वा

किं तस्या गर्भे जातम् ? । यत्तत्रोत्पद्यते ग्रामे तदालेयम् । इमानि गोरूपाणि गोबलीवर्दाश्च समेता उच्यन्ते ।

जगत्तुङ्गसमा । अहोरात्रम् । पुसि हर्म्ये । क्लीबे वामन ।
हरीतक., हरीतकी, हरीतकम् । वामन. ।

अन्यापि संशयि गतार्थमनिष्टसङ्गि
लिङ्गानुशासनमिहाज्ञतया मया यत् ।
प्रोक्तं हि किञ्चिदविचार्य तदार्यवर्यैः
संस्कार्यमस्ति यदि कार्यमुतावधीर्यम् ॥ ३२ ॥
लिङ्गानुशासनमिदं कृतमुन्नतेन
शुभ्रैर्गुणैः कविहितं भुवि वामनेन ।
बुद्ध्वाऽखिलं विमलशब्दगतप्रमेयं
नातः परं शुभतरं स्फुटमस्ति लोकाः ॥ ३३ ॥

इति लिङ्गानुशासनवृत्तिः समाप्ता ।

संवत् १२७३ श्रावणवदि ८ रवौ लिङ्गवृत्तिपुस्तका लिखितेति ।

629

the works of Mâgha, Bhavabhûti, and Bhaṭṭa Nârâyana, the author of the Venîsamhâra. He also quotes Kavirâja, who may be the same as that mentioned by Râjaśekhara as a poet belonging to the Yâyâvara family. That he belonged to Kâśmîra is evident from the statements of Sahadeva, the earliest commentator of Vâmana's Kavyâlankârasûtravṛtti, that the study of Vâmana's work had fallen in desuetude and that Bhaṭṭa Mukula procured from somewhere a ms. of the work and revived its study.[1] Sahadeva heard the work from Bhaṭṭa Mukula, who seems to be the same as the author of the Abhidhâmâtṛkâ and the preceptor of Pratihâra Indurâja, the commentator on Udbhaṭâlankârasârasaṅgraha. The commentator Sahadeva, moreover, mentions at the end of his commentary his leaving Kâśmîra. The rhetorician Vâmana is, thus, posterior to Mâgha (latter half of the 7th century A. D.) and Bhavabhûti (first quarter of the 8th century A. D.). Vâmana is quoted by Ânandavardhana (about 857 to 884 A. D.) in his Dhvanyâloka and by Râjaśekhara (about 880 to 910 A. D.) in his Kâvyamîmânsâ. Thus it follows that the rhetorican Vâmana must have lived between the latter half of the 8th and the first quarter of the 9th century A. D. This date agrees with that which we have assigned to the author of the Lingânuśâsana.

The religion of Vâmana.—The absence of Mangala in the Kâśikâ has been taken to indicate that Vâmana was not orthodox and the use of the Chândra and Jainendra grammars tend to show his heterodox tendencies. In his Kâvyâlankârasûtravṛtti a salutation is made to no particular deity but to the great lustre. In the present work, however, he makes a salutation to Siddha, who is described as one who has desisted from all action and who has composed scriptures

1 वेदिता सर्वशास्त्राणां भट्टोऽभून्मुकुलाभिधः ।
लब्ध्वा कुतश्चिदादर्शं भ्रष्टाम्नायं समुद्धृतम् ।
काव्यालङ्कारशास्त्रं यत्तेनैतद्वामनोदितम् ।
असूया तत्र कर्त्तव्या विशेषालोकिभिः क्वचित् ॥
आकर्ण्य भवतः तस्माद्दयितस्य विधीयते ।
विवृतिः सहदेवेन वामनीयस्य सम्प्रति ॥
चतुर्दशानामपि यः प्रसिद्धो विद्यास्थितीनां परपारदृश्वा ।
शशाङ्कपूर्वं पर इत्युदारं यन्नामलोके नितरां प्रसिद्धम् ॥ १ ॥
तदीयशिष्यः सहदेवनामा कुले प्रसूतः खलु तोमराणाम् ।
व्याख्यामिमां काव्यविचारशास्त्रे व्यधत्त लब्धोमिह वामनीये ॥ २ ॥
काश्मीरदेशादपसर्पतो मे शब्दानुशुद्धिं त्रिमुनिं निशाम्य ।
अवाप्तसिद्धेर्वरणात्मजस्य प्रयोजकोऽभूदिह पद्मनाभः ॥ ३ ॥

APPENDIX I

QUOTATIONS IN VÂMANA'S LINGÂNUŚÂSANA

कश्येव भारती यस्य p. 2 (Harshacharitra I–9)

यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसञ्ज्ञका भवन्ति p. 2 (Mahâbhâshya on 1-4-60)

प्रोषितार्यमणं मेरोरन्धकारस्तटीमिव P. 4 (Śiśupâlavadha II–39)

तानि धर्माणि प्रथमान्यासन् p. 8 (Ṛgveda I–166–43)

रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः p. 80 (Occurs in Vâghbhata too)

एष धर्मः सनातनः (Occurs also in the Uttararâmacharitra V–22)

मातुरुच्चार एव सः । (Mahabhârata 5–4516)

स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रः शत्रून् स्वरतोऽपराधात् p. 12(Mahâbhâshya)

[जात्यश्रितातिहि (रि ?) मलीमसशाटकानां
मित्रादपि प्रथमयाचितमाटकानाम् ।
पुत्रादपि प्रियतमैकवराटकानां]
वज्रं दिवः पततु मूर्ध्नि किराटकानाम् ॥ p. 12

दुन्दुभ्या किल तत्कृतं पतितया यद्द्रौपदी हारिता p. 16

अहोरात्राविमौ पुण्यौ ।

for the benefit of the people. His drawing upon the Buddhist and Jain authors Chandra and Devanandi would also support the view about his leaning towards Buddhism and Jainism.

Conclusion.—*It is true that one searches in vain the Kâśikâ*, the Kâvyâlankârsûtravrtti and the Lingânuśâsana to find out indications to establish the identity of the authors of these works. But the old commentators of the Amarakośa quote him both from the Kâśikâ and the Ligânuśâsana under the name of Vâmana without any distinction and we have assigned one and the same period to the authors of the Kâvyâlankârasûtravṛtti and the Lingânuśâsana from quite independent data. The Kâvyalankârasûtravrtti is described as favourite of poets (कविप्रिया) and the Lingânusâśana is, likewise, as beneficial to poets (कविहित). If it is assumed that there was one person Vâmana, the author of all these works—a grammarian, poet, and rhetorician all combined, he would appear to have been at first at the court of Jayâpîḍa[1] and laterly probably through his oppressions to have left him and gone to the court of the Râshṭrakûṭa Emperor Jagattunga who was at that time wielding paramount power. Such migrations of Kâshmerian poets were not rare. The poet Bilhaṇa's example is too well-known to the students of the history of Sanskṛta literature. Jagattunga I and Jayâpîda 779–808 A. D. were contemporaries and thus the date of Vâmana is between the last quarter of the 8th and the first quarter of the 9th century. From other data we have arrived at the same date.

The Ms. material.—The present edition of Vâmana's Lingânuśâsana has been based on a single palm-leaf ms. of the work with the commentary heitherto known. It is 10¾" inches long and 1¼" inches broad and consists of 42 leaves containing four lines each and is dated Samvat 1273 (1216 A. D.) The portions on the left sides of the *folios* 35, 37 and 40 were missing. The ms. belongs to the Sangha's Bhandar in Phophalia Vâdâ, Patan. There is in the palm-leaf mss. of the Bhandar in Śântinâtha's temple at Cambay a ms. of the text of the Kârikâs (No. 266, folios 63–66) dated Samvat 1287 (1231 A. D.) and from that the late Dr. Peterson published in his third report the bare text, which had been edited very incorrectly partly because of not reading the palm-leaf ms. correctly and the absence of a commentary to explain the real meaning of the aphoristic Kârikâs.

1 मनोरथः शङ्खदत्तश्चटकः सन्धिमांस्तथा ।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः ॥
राजतरङ्गिणी 4–497

वामनीयलिङ्गानुशासन

ERRATA

P. 2. l. 6 आवृत्या
P. 3. l. 18 & P. 11 l. 12 अनेहा
P. 4. l. 9 19 द्विगु
P. 8. l. 7 आशिर्तभवो
P. 11 l, 3 अर्द्धटच्
P. 12. l. 6 & P. i l. 10 इन्द्रशत्रुः
P. 14. l. 11 आदिजनापःपराणि
P. 15. l. 9 दरद्
P. 21 l. 10 पुस्तिका

…निहतजन्ममरणकारणः स सिद्धः प्रणन्तुमिष्टः प्रणामयोग्य-
त्वाद्विदिताखिलवाङ्मयमिति विशेषितत्वाद्वा। अत एवाञ्जनसिद्धादि-
व्युदासाय विशेषणमुपादीयते। किंविशिष्टम् । सिद्धं विबुधजनेष्ट-
मिति। विबुधा हेतु''''इष्टः पूजितो यः सिद्धो देवताविशेषः स
तथोक्तस्तम्। प्रणम्येति। पुनरपि प्राप्ताष्टगुणैश्वर्यादिमा'''''''' । विदि-
ताखिलवाङ्मयमिति । विदितं ज्ञातमखिलमशेषं वाङ्मयं वस्तुजातं
येन स तथोक्तस्तं प्रणम्य'''' । एवमयमिष्टदेवतानमस्कारः सामा-
न्येनोक्तः। साम्प्रतमधिकृतदेवतानमस्कारार्थं प्रतिपादनाय च विशेष-
णमुपादीयते। आप्तमिति । यो दृष्टेष्टाविरुद्धाविसंवादिवचनोऽत्यन्त-

सकललोकहितागमप्रणेता विश्वसनीयः स आप्तः। य एवंविधः सिद्धस्तं प्रणम्येति। अनेनाशेषशास्त्रप्रशास्तृत्वमापादितं भवति। तथा चोच्यते लिङ्गानुशासनमाप्तमिति। स्त्रीपुंनपुंसकलिङ्गस्याधिकृतस्यानुशासनो यः स तथोक्तस्तं प्रणम्य। अथवा लिङ्गं चिह्नं लक्षणं सर्वस्यैव तस्यानुशासनं सिद्धं प्रणम्य लिङ्गानुशासनं शास्त्रं वच्मि कथयाम्यहमिति सम्बन्धः। आवृत्त्याश्वेतो धावति। "कथेव भारती यस्य" इति यथा तथा लिङ्गानुशासनशब्दः सम्बध्यते। शब्दशास्त्रविवक्षितस्त्रीपुंनपुंसकलिङ्गान्युच्यन्ते तल्लिङ्गमनुशिष्यते निगद्यते येन तच्छास्त्रं तथोक्तं तदहं वच्मि। तच्च सिद्धमनादिकालव्यवस्थितं साधुशब्दप्रयोगवत्। अथवा सिद्धमसंस्कार्यविसंवादि च तत् वच्मि। अन्यत् विबुधजनेष्टं तत्। विशेषेण विविधा वा बुधाः विबुधाः पण्डितास्तेषां जनः समुदायः तस्य इष्टमभिमतं साधुशब्दप्रयोगोपयोगित्वात्। तच्च विदिताखिलवाङ्मयम्। विविधैः प्रकारैः दितं खण्डितं तत्तनलादिखण्डैः अखिलं वाङ्मयं यस्मिंस्तत्तथोक्तं लिङ्गानुशासनमहं वच्मि। विदितमित्यत्र " यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञका भवन्ति " इति यतः "अच उपसर्गात्तः" (७–४–४७) इति त–आदेशो न भवति। प्रणम्यादाप्तं नमस्यादाराध्याद्देवताविशेषादुपलब्धं लिङ्गानुशासनं वच्मीति। पूर्वाचार्यैर्व्याडिप्रमुखैर्लिङ्गानुशासनं सूत्रैरुक्तं, ग्रन्थविस्तरेण च। अहं पुनरार्याभिर्वच्मि सुखग्रहणार्थम्। वररुचिप्रभृतिभिरप्याचार्यैरार्याभिरभिहितमेव। तदतिबहुना ग्रन्थेनेत्यहं तु समासेन सङ्क्षेपेण वच्मीत्यत उच्यते नमस्कारः।

नाम नपुंसकलिङ्गं तत्तनलस्त्वुत्वशब्दपर्यन्तम्।
मन्नन्तो ह्यजुदितमपि सन्तं हल्पूर्वरुयान्तम् ॥ २ ॥

यद्व्युत्पत्तिमन्तरेणैवार्थप्रतीतिकरमनादिसाङ्केतिकमभिधानं तन्नाम पर्यायः रूढशब्द इत्यर्थः। तदिह विशेषणाधिकृतं वेदितव्यं, नपुंसकलिङ्गं च, आ पुल्लिङ्गात्। त-त्त-न-ल-स्त्वु-त्व इत्येते शब्दाः पर्यन्तोऽवसानं यस्य तत्तथोक्तं नाम नपुंसकलिङ्गं भवति। त इति। इदं व्रतं नियमग्रहणम्, इदं मतमभिप्रायः, इदं पलितं श्वेतकेशः, क्षतं व्रणम्, अलातमुल्मुकम्। त्त। इदं वृत्तं छन्दोरचना, निमित्तं हेतुः, पित्तं मायुः, चित्तं

मनः, वित्तं द्रव्यम् । न । विपिनं वनं, काननमटवी, जघनं पूर्वकटीभागः, आननं मुखम् । ल । शीलं स्वभावः, मूलं प्रसिद्धमेव, जलं सलिलं तोयं, कमलं पद्मम्, उत्पलमिन्दीवरम् । स्तु । इदं वस्तु पदार्थः, इदं मस्तु दध्नो यदधः पानीयं, वास्तु भूमिविशेषः । त्व । इमानि तत्त्वानि पृथिव्यादीनि, इदं सत्त्वं गुणः । नामेति किम् ? । रचितो ग्रन्थः, कृता स्तुतिः, कृतं कुण्डं, कृत्तः कटः, कृत्ता साटिका, गोदोहनः घटः, सुशीलः पुरुष इत्यादि । त्वेति तशब्दसंयुक्तग्रहणात्, रत्नचिह्ने चेति निर्देशाच्च, तत्तनलशब्दाः केवला एव गृह्यन्ते । तेनेह नपुंसकलिङ्गता न भवति । अयमन्तः अवसानं, हस्तः पाणिः, मुहूर्त्तः क्षणः, धम्मिल्लः केशरचना, चिक्खल्लः कर्दमः । मन्शब्दो अन्तो यस्य स मन्नन्तो, द्व्यच् द्वौ अचौ यस्मिन्स द्व्यच् । मन्नन्तो यो द्व्यच्छब्दः स नपुंसकलिङ्गो भवति । इदं साम प्रियं वेदश्च, धाम स्थानं तेजश्च, शर्म सुखं, भस्म भूतिः । पुल्लिङ्गनिर्देशान्मन्नन्त इत्यत्र सामान्येन शब्दः परिगृह्यते, न नामैव । तेन प्रियस्य भाव इदं प्रेम, बहूनां भाव इदं भूम । द्व्यजिति किम् ? । अयं तरीमा कल्पः । सवीमा प्रसवः । द्व्यजुदितमपि सन्तम् । पुल्लिङ्गं स्त्रीलिङ्गं वा प्रोक्तमपि सकारान्तं द्व्यच् नाम नपुंसकलिङ्गं भवति । इदं यशः कीर्त्तिः, तेजः दीप्तिः, ओजः दीप्तिः बलं च, ओकः स्थानं, यादो जलजन्तुः । द्व्यजिति किम् ? । अयं दोर्बाहुः, अयमनेहाः कालः । उदितमपि । इदं रक्षः राक्षसः, तमः राहुः । दैवाभिधानत्वात्पुल्लिङ्गमुक्तम् । इदं वयः पक्षी, प्राण्यभिधानात्पुल्लिङ्गमभिहितम् । नामेति किम् ? । सौजाः पुरुषः, सौजाः स्त्री । सान्तमेव द्व्यजुदितमपि नपुंसकलिङ्गं भवति । अन्यत्र पुनरनुदितमेव वेदितव्यम् । तेनायं पारापतः पक्षी, शैलः पर्वतः, असनः वृक्षविशेषः, पुत्रः तनयः, शत्रुः अरिः, आर्यः साधुरित्यादि । हल्पूर्वो येभ्यस्ते हल्पूर्वा रुयशब्दास्तेऽन्ते यस्य तत्, तथोक्तं नाम नपुंसकलिङ्गं भवति । र । गोत्रं कुलं, पात्रं भाजनं, पत्रं पर्णं, वस्त्रं वासः । रु । अश्रु नेत्रवारि, श्मश्रु मुखरोमाणि, जत्रु गलादूर्ध्वम् । य । धान्यं सस्यं व्रीह्यादि, आज्यं घृतं, द्रव्यं धनम् ।

भवनस्य रजतहान्तं चार्थरणापत्यहृदयताल्वपुराम् ।
रान्तं च तनोद्वारुडुतमसामव्यक्तलिङ्गोक्तौ ॥ ३ ॥

र-ज-त-ह-शब्दाः अन्तो यस्य तत्तथोक्तं । भवनस्य गृहस्य नाम नपुंसकलिङ्गं भवति । च शदाद्यथोक्तं च । र । अगारं मन्दिरम् । ज । उटजं मुनिगृहम् । पुनः तशब्दग्रहणमन्यसंसृष्ट-त-शब्दान्तार्थम्। नि-शान्तम् । ह । गेहं गृहम् । गृहशब्दस्तु अर्द्धर्चादिषु पठ्यते । तेन तद्विशेषणमपि पुल्लिङ्गेऽपि दृश्यते । अन्तरे गृहाः, अन्तराणि गृहाणि । वाह्याश्चाण्डालादिगृहा इत्यर्थः । चशब्दादुदवसितं भवनं वेश्म धिष्ण्यम् । रजतहान्तमिति किम् ? । अयमावसथः भवनं, प्रासादः धवलगृहं, मठः यतिनिलयः, आवासः । आलयः । अ-र्थादीनां यन्नाम तन्नपुंसकलिङ्गं भवति । इदं द्रविणं द्युम्नं, स्वा-पतेयं वसु, रणं युद्धमम्बरीषं संयत् संयुगं जन्यं प्रधनमायो-धनं मृधं सङ्ख्यं समित् समीकम् । इदमपत्यं तोकम् । प्राणिनो विशे-षाणामिति पुल्लिङ्गं वक्ष्यति तस्यापवादः । हृदयं हृत् मानसं स्वान्त-मिति । तालु काकुदं, पुरं नगरम् । रान्तं च तनोः । रशब्दान्तं च, चशब्दाद्यथाप्राप्तं च, तनोः शरीरस्य नाम नपुंसकलिङ्गं भवति । इदं श-रीरं कडेवरम् । च शब्दाद्यथाप्राप्तं च । वपुः शरीरम् । रान्तं चेति किम् ? । अयं कायो देहः । द्वार् । इदं द्वारं गोपुरम्, उडु भमृक्षं नक्षत्रं, तमः तिमिरं ध्वान्तम् । अन्धकारशब्दस्तु अर्द्धर्चादिषु पठ्यते । तेन पुल्लिङ्गेऽपि दृश्यते । "प्रोषितार्यमणं मेरोरन्धकारस्तटीमिव" इति । अव्यक्तलिङ्गो-क्तौ । अस्पष्टलिङ्गस्य उक्तावभिधाने यत् प्रयुज्यते तन्नपुंसकलिङ्गं भवति। किं तस्या गर्भे जातम् ?, यत्तत्रोपपद्यते ग्रामे तदानेयम् । इमानि गोरूपा-णि गावो बलीवर्दाश्च समेता उच्यन्ते । इमानि भूतानि सर्वे प्राणिनः । सप्तमीनिर्देशादव्यक्तलिङ्गोक्तौ प्रयुज्यते तन्नपुंसकलिङ्गं भवति, न पुनरव्यक्तलिङ्गाभिधायि नपुंसकं भवति । अन्यथा सुतशिशुगो-सिन्धुशब्दानामव्यक्तलिङ्गोक्तौ नपुंसकत्वं प्रयुज्यते ।

दलपलविलहिमखामृतभयमुखसुखदुःखपुण्यपापविशाम् ।
प्रसवाभरणविलेपव्यञ्जनफललवणजातीनाम् ॥ ६ ॥

दलादीनां नामानि नपुंसकलिङ्गानि भवन्ति । इदं दलं पर्णं वर्हः छदनं पलाशं, पलं मांसं तरसं, विलं विवरं गह्वरं, हिमं प्रालेयं तु-षारं नीहारम् । खमिन्द्रियं गगनं चोच्यते । तद्वयोरपि नाम नपुंसकलिङ्गं

भवति। इदं खमिन्द्रियं हृषीकमक्षं, खमम्बरं वियत् विहायः। अमृताभिधानं पीयूषम्। भयं साध्वसम्। भीतिशब्दस्तु भयं भीतिरिति स्त्रियाम् क्तिनि कृते सिद्ध इति व्युत्पत्त्यपेक्षत्वात् नाम नेष्यते। मुखं तुण्डं, पुष्करं मुरजमुखं, सुखं शर्म जोषं, दुःखं द्वन्द्वं, पुण्यं शुभं भाग्यं, पापमघम्। विशो विष्ठाया यन्नाम। पुरीषं शकृत् अशुचि गूथम्। प्रसवग्रहणात् कुसुमस्य यन्नाम तन्नपुंसकलिङ्गं भवति। कुसुमं पुष्पम्। कुसुमत्वं जातिसामान्यं येषां तन्नाम नपुंसकलिङ्गं भवति। इदं तामरसं कुशेशयं पुण्डरीकं कल्हारं कुमुदं चम्पकं मुद्गरकं मुचुकुन्दम्। आभरणं भूषणम्। आभरणजातीनां नाम। केयूरमङ्गदं कटकं, मुकुटं तिरीटं किरीटम्। विलेयजातीनाम्। विलीयत इति विलेयं विलयनं द्रवत्वं, तत्सामान्यं जातिर्येषां तदभिधानम्। इदं सिक्थं मदनम्। इदं जतु लाक्षा, इदं त्रपु वङ्गं, सीसकं नागं, शुल्वं ताम्रं, लोहं कृष्णमयः, सुवर्णं स्वर्णं, तारं रूप्यकम्। व्यञ्जनजातीनाम्। दधि दुग्धं क्षीरं, तक्रमुदश्वित् कालसेयं, मधु माक्षिकम्। फलादीनां नामानि। कपित्थं दधित्थं पनसं लकुचम्। लवणजातीनां नाम। विडमौद्भिदं रोमकम्। लवणग्रहणाद्यदग्निना विलीयते तन्नपुंसकं भवति, न पुनर्यज्जलेनापि, अन्यथा मृदोऽपि नपुंसकत्वं प्रयुज्यते।

दार्वश्रौषधजलधनुरुदराजिरशिखरवस्त्रपिच्छानाम्।
द्विगुरपि पात्राद्यन्तः क्रियाव्ययविशेषणश्चैक्ये ॥ ५ ॥

दार्वादीनां नाम नपुंसकलिङ्गं भवति। इदं दारु काष्ठम्, अश्रं रुधिरं रक्तं क्षतजम्, औषधं भैषजं, जलं तोयं पानीयं नीरं वारिकं, धनुश्चापं कार्मुकं कोदण्डम्, उदरं जठरं तुन्दम्, अजिरं प्राङ्गणं, शिखरं शृङ्गं कूटं, वस्त्रमम्बरमंशुकं प्रावरणं, चीवरं चीरं भिक्षुपरिधानम्। पिच्छं बर्हम्। द्विगुश्च समासः पात्रादिशब्दोत्तरपदः नपुंसकलिङ्गो भवति। क्रियाया अव्ययस्य च यो विशेषणशब्दः स च नपुंसकलिङ्गो भवति। उभावप्यैक्ये एकत्वे भवतः। त्रीणि पात्राणि समाहृतानि त्रिपात्रं, चतुष्पात्रं, त्रिभुवनं, चतुर्युगं, द्विपथं, त्रिपथं, चतुष्पथं, त्रिरात्रम्। क्रियाविशेषणः। मृदु पचति, नीचं गच्छति, लघु आगच्छति। अव्ययविशेषणः। पुरस्ताद्रमणीयं दिग्देशः कालो वा। पुल्लिङ्गनिर्देशान्नामैव न गृह्यते। तेन सविनयं पृच्छति, सबहुमानमामन्त्रयते।

छाया सभा बहूनां सङ्घे राजार्थराक्षसादीनाम् ।
भवने च तत्समासे द्वन्द्वैकत्वाव्ययीभावौ ॥ ६ ॥

येषां बहूनां समुदितानां सतां छाया भवति, तेषां सम्बन्धिनी छाया तैश्च सह समासे नपुंसकलिङ्गं भवति । शलभानां छाया शलभच्छायम्, इषुच्छायं, धनुच्छायम् । बहूनामिति किम् ? । वृक्षस्य च्छाया वृक्षच्छाया वृक्षच्छायम् । नित्यं नपुंसकार्थमिदं वचनम् । तत्समास इति किम् ? । शलभानां परमच्छाया । सभाशब्दः सङ्घे वाच्ये येषां च सङ्घस्तैः सह समासेन नपुंसकलिङ्गो भवति । स्त्रीणां सभा स्त्रीसभं, ब्राह्मणानां सभा ब्राह्मणसभं सङ्घ इत्यर्थः । सभा राजार्थराक्षसादीनां भवने च । राजाभिधेयो येषां शब्दानां तेषां सम्बन्धिनी सभा भवने वाच्ये तैश्च सह समासे नपुंसकलिङ्गं भवति । इनस्य सभा इनसभम्, ईश्वरसभं नृपतिसभं भवनं सङ्घो वा । राजार्थानामिति किम्? । राजशब्देन सह समासेऽपि न भवति । राजसभा, जगत्तुङ्गसभा । राक्षसादीनां राक्षसप्रकाराणां सभा सङ्घे भवने च वाच्ये तत्समासे नपुंसकलिङ्गा भवति । राक्षसानां सभा राक्षससभं, पिशाचसभं सङ्घ इत्यर्थः । राक्षससभं भवनम् । द्वन्द्वैकत्वाव्ययीभावौ । द्वन्द्वस्य यदेकत्वमेकवद्भावः स नपुंसकलिङ्गो भवति । पाणिपादं, मार्दङ्गिकपाणविकं, हस्त्यश्वं, धवखदिरपलाशं, शशहरिणम्, अहोरात्रम् । अव्ययीभावसमासश्च नपुंसकलिङ्गो भवति । अधिस्त्रि, उपबन्धु । पञ्चनदं, सप्तगोदावरं, शनैर्गङ्गम्, उन्मत्तगङ्गं, लोहितगङ्गम्, इत्यत्र यद्यप्यन्यपदार्थेऽव्ययीभावस्तथापि वाच्यवल्लिङ्गं न भवति, अव्ययीभावसामर्थ्यात् ।

कृतपष्ठ्यन्तसमासे तदादिकथने ह्युपक्रमोपज्ञे ।
कन्थोशीनरदेशे नाम्न्यव्ययपूर्वकश्च पथः ॥ ७ ॥

उपक्रम्यत इत्युपक्रमः । "अकर्त्तरि च कारके सञ्ज्ञायाम् (३-३-१९)" इति कर्मणि घञ् । उपज्ञायत इत्युपज्ञा । "आतश्चोपसर्गे (३-३-१०६)" इति कर्मण्येव स्त्रियामङ् । उपक्रमश्चोपज्ञा च षष्ठ्यन्तेन सह समासे कृते नपुंसके भवतः । तदादिकथने । तस्य उपक्रमस्य उपक्रम्यस्य च प्राथम्यकथने, तस्याश्चोपज्ञाया उपज्ञेयस्य च प्राथ-

न्यकथने गम्यमाने । नन्दस्य उपक्रमाः नन्दोपक्रमाणि मानानि । नन्देन किल प्रथमं मानानि कृतानि । तथा पाणिनेरुपज्ञा पाणिन्युपज्ञमकालकं व्याकरणम् । पाणिनिना प्रथमं कालाधिकाररहितं व्याकरणं कर्तुं शक्यमिति परिज्ञातम् । तथा चन्द्रोपज्ञमसंज्ञकं व्याकरणम् । तदादिकथन इति किम् ? । देवदत्तोपक्रमः प्राकारः, यज्ञदत्तोपज्ञो रथः । आद्यज्ञानमुपज्ञा । कन्थोशीनरदेशे नाम्नि । कन्थाशब्दः कृतषष्ठ्यन्तसमासः नाम्नि गम्यमाने नपुंसकलिङ्गो भवति, सा चेत् कन्था उशीनरदेशे भवति । सौशमीनां कन्था सौशमिकन्थम्, आह्वरकन्थम् । नाम्नीति किम् ? । वीरणानां कन्था वीरणकन्था, वीरणरचितः कटः । उशीनरदेश इति किम् ? । दाक्षीणां कन्था, दाक्षिकन्था । ग्रामस्येयं संज्ञाऽस्ति, किन्तु उशीनरदेशे स ग्रामो न भवति । अव्ययपूर्वकश्च पथः । पथ इत्येष कृतसमासान्ताच्प्रत्ययः अव्ययपूर्वकः स नपुंसकलिङ्गो भवति । कुत्सितः पन्थाः कापथम् । "ऋक्पूरब्धूःपथामानक्षे (५-४ ७४)" इत्यच् प्रत्ययः । "नस्तद्धिते (६-४-१७४)" इति टिलोपः । "कापथ्यक्षयोश्च (६-३-१०४)" इति कोः कादेशः । विरूपः पन्थाः विपथं, दुष्पथम् । अव्ययपूर्वक इति किम् ? । जले पन्थाः जलपथः । कृतसमासान्तग्रहणं किम् ? । शोभनः पन्थाः सुपन्थाः । "न पूजनात् (५-४-६९)" इति समासान्तप्रतिषेधः । चशब्दाद्यथाप्राप्तं च पथशब्दस्य लिङ्गं भवति । द्वौ पन्थानौ समाहृतौ द्विपथं, त्रिपथं, चतुष्पथमिति । द्विगुरपि पात्राद्यन्त इति नपुंसकत्वम् । न विद्यते पन्था यत्र स देशः अपथो देशः, साऽटवी अपथा, तद्वनमपथमिति वाच्यवत्परत्वाल्लिङ्गं भवति ।

भावेऽचिन्नणकान्तोऽदन्तो हि समूहभावकर्मार्थः ।
धर्मार्द्धसारमित्राः स्वाङ्गदलन्यायसुहृदर्थे ॥ ८ ॥

भावेऽभिधेये यः शब्दो भवति अदन्तः स नपुंसकलिङ्गो भवति । चकार इयस्य स चित्, चिच्च नश्चाणश्च कश्च चिन्नणकास्ते प्रत्यया अन्तो यस्य स तथोक्तः तदन्यप्रत्ययान्तः भावे अकारान्तः नपुंसकलिङ्गो भवति । भसितं छात्रस्य शोभनं भक्तं लब्धं सिद्धं करणं हरणम् । सांराविणं सान्द्राविणमित्यत्र रु शब्दे द्रुगतौ इत्येताभ्यां सम्पूर्वाभ्याम् "अभिविधौ भाव इनुण् (३-३-४४)" इति इनुण्प्रत्ययः । वृद्धिरावादेशः । "अणि-

नुणः (५-४-१५)" इति तद्धितः अण्। आदिवृद्धिरनुस्वारः। "इनण्यनपत्ये (५-४-१५४)" इति प्रकृतिभावः। "अट्कुप्वाङ् (८-४-२)" इति णत्वम्। आसितव्यं, शयितव्यं, शयनीयं, स्थेयं, स्थातव्यम्। ईषदाढ्यंभवं, दुराढ्यंभवमित्यत्र "कर्तृकर्मणोश्च भूकृञोः (३-३-१२७)" इति खल्प्रत्ययः। "अरुर्द्विषदजन्तस्य मुम् (६-३-३७)" इति मुमागमः। देवभूयम्। "भुवो भावे (३-१-१०७)" इति क्यप्। भावे चाकर्मकेभ्यः इत्यधिकृत्य तयोरेव कृत्यक्तखलर्था इति भावे विधानम्। अचिन्नणकान्त इति किम्?। "एरच् (३-३-५६)"। चयः नयः। "आशिते भुवः करणभावयोः (३-२-४५)" इति खच्। आसितंभवो वर्तते। न इति नङ्ननोः सामान्येन ग्रहणात् "यजयाचयतविच्छप्रच्छरक्षो नङ् (३-३-९०)"। यज्ञः, यत्नः, विश्नः, प्रश्नः, रक्ष्णः। याच्ञा तु दीर्घान्तत्वात् स्त्रीलिङ्गा भवति। "स्वपो नन् (३-३-९१)"। स्वप्नः। णन्त्यादः। "नौ ण च (३-३-६०)" इत्यदो णप्रत्ययः। क। आखूनामुत्थानमाखूत्थो वर्तते। पिच्छ इत्यत्र च्छग्रहणाद्भावे कप्रत्ययः। अदन्त इति किम्?। कारणा, हारणा, छिदा, भिदा, कृतिः, धृतिः, हृतिः। समूहभावकर्मार्थः। समूहः भावः कर्म चार्थोऽभिधेयं यस्य स तथोक्तः शब्दः अदन्तः नपुंसकलिङ्गो भवति। भैक्षं पादातम्। "भिक्षादिभ्योऽण् (४-२-३८)" इत्यण् प्रत्ययः। राजकं, राजन्यकम्, अश्वीयम्। भावार्थः। श्वेतत्वं श्वैत्यं, कार्ष्ण्यं, दार्ढ्यम्। "वर्णदृढादिभ्यः ष्यञ्च (५-१-१२३)" इति ष्यञ्। कर्मार्थः। ब्राह्मण्यम्, आधिपत्यम्। "गुणवचनब्राह्मणादिभ्यः कर्मणि च (५-१-१२४)" इति ष्यञ्। सख्यं स्तेयम्। "स्तेनाद्यन्नलोपश्च(५-१-१२५)" इति यत् नलोपश्च। गौरवं लाघवं मार्दवम्। अदन्तेति किम्?। ग्रामता, जनता, बन्धुता, सहायता, गजता, राजता, श्वेतता, रक्तता, ब्राह्मणता। अकारान्ता अमी समूहभावकर्माण्यभिधातुं समर्था नान्यथेति। प्रथिमा, म्रदिमा, गरिमा, लघिमा। "पृथ्व्यादिभ्य इमनिच् वा(५-१-१२२)" इति इमनिच्। नान्तत्वात् पुल्लिङ्गता भवति। धर्म-अर्द्ध-सार-मित्र-इत्येते शब्दाः स्वाङ्ग-दल-न्याय्य-सुहृद्-इत्येतेष्वभिधेयेषु नपुंसकलिङ्गा भवन्ति। धर्मशब्दः धर्मसाधने योगादौ वाच्ये। इदं धर्मम्। "तानि धर्माणि प्रथमान्यासन्(ऋग्वेद १-१६४-४३)। स्वाङ्ग इति किम्?। एष धर्म्मः सनातन इति। अर्द्धशब्दः दले। द्वयोः समप्रविभागे। इदमर्द्धं पिप्पल्याः अर्द्धपिप्पली।

अर्द्धहरीतकी। दल इति किम्?। सोमस्यार्द्धः सोमार्द्धः। अत्रार्धशब्द एकदेशवचनः। अत एव " अर्धं नपुंसकम् (२-२-२) " इत्येष समासो न भवति। सारशब्दः न्यायादनपेते। इदं सारं न्याय्यम्। तथा "सारं च तत्सङ्ग्रहश्च सारसङ्ग्रहः" इति। न्याय्य इति किम्?। अयं सारः प्रधानम्। मित्रशब्दः सुहृदि सख्यौ। इदं मित्रं सखेत्यर्थः। सुहृदिति किम्?। अयं मित्रः रविः। मरुद्विशेषाभिधानत्वात् पुल्लिङ्गत्वं मित्रशब्दस्य। शेषाणामदन्तत्वात् पुल्लिङ्गता।

कुहकं चिबुकं लिङ्गं क्रकचं बीजं ललाटशृङ्गाटम्।
वटपिटलोष्टकरोटं पीठं पृष्ठं च कुष्ठं च॥ ९॥

कुहकादीनि नामानि नपुंसकानि भवन्ति। एषामप्यदन्तत्वात् पुल्लिङ्गं प्राप्तम्। इदं कुहकम् आश्चर्यं, चिबुकं हनुः, लिङ्गं मेढ्रः चिह्नं च, क्रकचं करपत्रं, बीजमङ्कुरं प्रकृतिः। ललाटं प्रसिद्धमेव। शृङ्गाटं त्रिकोणं, वटं वटकं, पिटं पिटकं, लोष्टं मृत्पिण्डखण्डं, करोटं करोदकं, पीठं स्थापनम्। पृष्ठं प्रसिद्धमेव। कुष्ठं त्वग्दोषः, द्रव्यविशेषश्च।

कुण्डाण्डभाण्डकारणशरणमृणक्षूणमुष्णतीर्थोक्थम्।
गुदवृन्दकुसीदानि श्राद्धान्ने रत्नचिह्ने च॥ १०॥

कुण्डादीनि नामानि नपुंसकानि भवन्ति। इदं कुण्डं प्रसिद्धमेव। अण्डं जन्तूनां कललाधारः। भाण्डं द्रव्यं भाजनं च, कारणं हेतुः, शरणं गृहावस्थानं तत्परता च, ऋणं देयद्रव्यं, क्षूणं विकलता, उष्णमातपः, तीर्थं जलावतरणं पुण्यप्रदेशश्च, उक्थं सामवेदः, गुदं पायुः, वृन्दं सङ्घातः, कुशीदं विज्ञानं वणिज्यादि च, श्राद्धं विधिपूर्वकं ब्राह्मणानां भोजनम्, अन्नमोदनानि। रत्नं प्रसिद्धमेव। चिह्नं लिङ्गम्।

रूपं तल्पं शिल्पं समीपकूर्पोडुपान्तरीपाणि।
बिम्बकुटुम्बे कुङ्कुमसिध्मेध्मयुग्मगुल्मं च॥ ११॥

रूपादीनि नामानि नपुंसकानि भवन्ति। रूपमाकृतिः, तल्पं शयनीयमट्टदाराश्च, शिल्पं विज्ञानं, समीपमासन्नता, कूर्पं भ्रुवोर्मध्ये रोम, उडुपं प्लवः, अन्तरीपं जलमध्याश्रयं, बिम्बमाकृतिस्थानं, कुटुम्बं

भार्यादि, कुङ्कुमं गन्धद्रव्यं, सिध्मं त्वग्दोषः, इध्मं समित्, युग्मं युगलं, गुल्मं वीरुत् व्याधिविशेषश्च ।

किशलयशिशिरकुकुन्दरचामरकान्तारतीरदूराणि ।
वैराक्षरान्तरोषरकिण्वशरावाणि दैवं च ॥ १२ ॥

किसलयादीनि नामानि नपुंसकानि भवन्ति । किसलयं पल्लवः, शिशिरमृतुविशेषः, कुकुन्दरं नितम्बस्थकूपकः, चामरं वालव्यजनं, कान्तारमटवी, तीरं तटं, दूरं विप्रकृष्टम् । वैरं प्रसिद्धमेव । अक्षरमकारादिवर्णः, अन्तरं मध्यं, ऊषरं यत्रोप्तं न प्ररोहति, किण्वं सुरायाः कारणं, शरावं मृत्पात्रं, दैवं पुराकृतं कर्म ।

कणिशं वडिशं पलिशं शीर्षं वर्षं च साहसं बुसम् ।
पुण्याहं सुदिनाहं यकृत्पुरीतज्जगद्भुवनम् ॥ १३ ॥

कणिशादीनि नामानि नपुंसकानि भवन्ति । कणिशं शाल्यादीनां मञ्जरी, वडिशं मत्स्यग्रहणं, पलिशं छादकविशेषः, शीर्षं मूर्द्धा, वर्षं वत्सरः, साहसं दुष्करं कर्म, बुसं धान्यमलः । पुण्यं च तत् अहश्च तत् पुण्याहम्, तथा सुदिनाहं, "राजाहःसखिभ्यष्टच्(५-४-९१)" इति टच् प्रत्ययः । परवल्लिङ्गं द्वन्द्वे तत्पुरुषे च इति नपुंसकत्वे सिद्धेऽपि नियमार्थं वचनम् । अन्यशब्दपरस्य तत्पुरुषे अहःशब्दस्य कृतटच्प्रत्ययस्य नपुंसकत्वं न भवति, अदन्तत्वात्पुल्लिङ्गं भवति । द्वे अहनी समाहृते द्व्यहः, त्र्यहः, पञ्चाहः, दशाहः, परमाहः, उत्तमाहः । यकृत् कालिजं, पुरीतत् अन्त्रं, जगत् लोकः, भुवनं स्वर्गः ।

नीडं गृहशशपूर्वे स्थूणोर्णे गन्धमादनास्थ्यक्षि ।
सक्थ्यररिकिशिपुजानु च कसेरुतोरणबिसार्द्रटबाहः ॥ १४ ॥

नीडादीनि नामानि नपुंसकानि भवन्ति । नीडं कुलायः पक्षिणामावासः । गृहशब्दपूर्वः स्थूणाशब्दः शशपूर्वश्च ऊर्णाशब्दः नपुंसके भवतः । गृहस्थूणं शशोर्णम् । गृहस्य स्थूणा शशस्योर्णेति परवल्लिङ्गत्वे प्राप्ते नपुंसकार्थं वचनमिदम् । इदं गन्धमादनं पर्वतविशेषः । अस्थि पञ्चमो धातुः । "रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः" । इदमक्षि लोचनं, स-

वालधिः। असि-अग-नद-अब्धि-कूपानां नाम पुल्लिङ्गं भवति। अयमसिः करवालः खड्गः, पर्वतः शैलः अद्रिः गिरिः। नदाभिधानम्। भिद्यः, उध्यः, लौहित्यः। अब्धिः समुद्रः उदन्वान्। अयं कूपः प्रधिः उदपानः। स्वर्नाम। अयं त्रिदिवः स्वर्गः। वज्रनाम। दम्भोलिः शतकोटिः पविः वज्रम्। वज्रशब्दस्त्वर्द्धर्चादिषु दृश्यते। तेन

" स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रः शत्रून् स्वरतोऽपराधात् "

तथा—["जान्वश्रितातिहिमलीमसशाटकानां
मित्रादपि प्रथमयाचितभाटकानाम्।
पुत्रादपि प्रियतमैकवराटकानां]
वज्रं दिवः पततु मूर्ध्नि किराटकानाम्।" इति

परशुः छिदिः भिदिः, रथः स्यन्दनः चक्री, मखः यज्ञः अध्वरः वितानः, घनः जीमूतः पर्जन्यः, घृणिः रश्मिः, रदः दशनः रदनः, पुष्यः तिष्यः सिध्यः, वलतः कुशूलः धान्यकोष्टकः।

ध्वनितरुविषमासासुरवर्णमरुत्प्राणिनां विशेषाणाम्।
धान्यानां रात्रो ह्यसमाहारे दुन्दुभिरनक्षे ॥ १६ ॥

ध्वनिनाम ध्वनिविशेषाणां च नाम पुल्लिङ्गं भवति। अयं ध्वनिः कलकलः कोलाहलः। ध्वनिविशेषाणां नाम। उदात्तः अनुदात्तः स्वरितः धैवतः। तरुः वृक्षः। तरुविशेषनाम। तालस्तमालः रसालश्चूतः आम्रः, अर्जुनः असनः, चन्दनः। विषनाम। हालाहलः मोहनः। मासविशेषाणां नाम। शुचिः शुक्रः नभस्यः। असुरनाम। दैत्यः। विशेषनाम। वलिः नमुचिः। शुचिः। वर्णविशेषः। श्वेतः नीलः लोहितः हरितः। मरुत् देवः। तद्विशेषः। इन्द्रः आदित्यः रविः अग्निः वह्निः। मरुद्वायुश्चोच्यते। तेन तन्नाम विशेषश्च पुंसि भवति। मरुद्वातः। अपानः उदानः पवमानः व्यानः प्रभञ्जनः। प्राणिनो नाम तद्विशेषाणां च नाम पुल्लिङ्गं भवति। पिता भ्राता जामाता नप्ता, पण्ढः वर्षधरः, ससिः अलिः कपिः अहिः वकः कपोतः पारापतः अनड्वान्। विशेषनाम। दूतः पण्डितः कविः मुनिः यतिः ऋषिः विपश्चित् सुहृत् दुर्हृत् शत्रुः सुतः आर्यः राजा युवा राजन्यः। प्राणिन इत्येकवचननिर्देशाद्बहूनां

प्राणिनां समेतानां यन्नाम तदनेन पुल्लिङ्गं न भवति। इयं श्रेणिः शिल्पसमूहः, इयं परिषत् शिष्टसमुदायः। धान्यानां यन्नाम पुल्लिङ्गं भवति। शालिः व्रीहिः तिलः। रात्रिशब्दः समासान्ताच्प्रत्ययो गृह्यते। सोऽसमाहारे वर्त्तमानः पुल्लिङ्गे भवति। अहश्चरात्रिश्चेति विगृह्य "अहःसर्वैकदेशसङ्ख्यातपुण्याच रात्रेः (५-४-८७)" इति टच्प्रत्ययः। "यस्येति च (६-४-१४८)" इति टिलोपः। "अहोरात्राविमौ पुण्यौ"। सर्वरात्रः पूर्वरात्रः मध्यरात्रः वर्षारात्रः दीर्घरात्रः। समाहार इति किम्?। अहोरात्रं द्विरात्रं त्रिरात्रं पञ्चरात्रम। द्विगुरपि पात्राद्यन्त इति नपुंसकता। दुन्दुभिरनक्षे। दुन्दुभिशब्दः अनक्षेऽभिधेये पुल्लिङ्गो भवति। दुन्दुभिः भेरीविशेषः विषं चोच्यते–अनक्ष इति किम्?। इयं दुन्दुभिः अक्षम्–उक्तं च—"दुन्दुभ्या किल तत्कृतं पतितया यद्द्रौपदी हारिता"।

ग्रन्थिकलिकेलिबलिगिरिदृतिराशि च मौलिकुक्षिपाण्यङ्घ्रि।
अञ्जलिहाहाहूहूसङ्केतव्रातपोतपुताः ॥ १७ ॥

ग्रन्थिप्रभृतयः शब्दाः पुल्लिङ्गा भवन्ति। अयं ग्रन्थिः प्रसिद्ध एव। कलिः कलहः युगं च,केलिः परिहासः,बलिः उपहारः, गिरिः कन्दुकः,दृतिः चर्ममयो जलाधारः, राशिः पुञ्जः। चशब्दः प्राण्यङ्गाप्राण्यङ्गयोर्विभागार्थः। तेनेह ग्रन्थ्यादिपठितो बलिशब्दोऽप्राण्यङ्गः पुल्लिङ्गो भवति। प्राण्यङ्गस्तु स्त्रीलिङ्गो भवति। इयं बलिः बली। मौलिः शिरश्चूलिका इति। कुक्षिराहाराधारः, पाणिः हस्तः, अङ्घ्रिः पादः, अञ्जलिः करविन्यासः। हाहाहूहू गन्धर्वौ। सङ्केतः प्रसिद्ध एव। व्रातः सङ्घातः, पोतः यानपात्रं, पुतः स्फिक्। सङ्केतादीनां तान्तत्वान्नपुंसकत्वं प्राप्तम्। पुल्लिङ्गार्थं वचनम्॥

स्तनवातायनहायनजनौदनाऽभिजनफेनवेमाश्म।
श्लेष्मोष्मपाप्मयक्ष्मात्मवर्ध्मेद्माश्च मन्त्रयुताः ॥ १८ ॥

एते स्तनादयः पुल्लिङ्गा भवन्ति। अयं स्तनः कुचः, वातायनो गवाक्षः, हायनः संवत्सरः, जनः लोकः, ओदनः तण्डुलपाकः, अभिजनः कुलीनता, फेनः जलविकारः, वेमा तन्तुवायोपकरणः, अश्मा पाषाणः, श्लेष्मा कफः, ऊष्मा उष्णत्वं, पाप्मा पापं, यक्ष्मा क्षयरोगः,

आत्मा जीवः, वध्रः चर्मतन्तुः, मेढ्रः शेफः, मन्त्रः ॐकारादिवर्णरचना । स्तनादीनां नान्तत्वात्, वेमादीनां मन्नन्तत्वात्, वध्रादीनां हल्पूर्वरान्तत्वात्, नपुंसकत्वं प्राप्तम् ।

गर्त्तोऽवटो निकाय्योऽथाच्छादपटस्तथोत्तरासङ्गः ।
नूपुरहारकलापा रैकोशस्वार्थविभवाश्च ॥ १९ ॥

गर्त्तादयः पुलिङ्गा भवन्ति । अयं गर्त्तः प्रसिद्ध एव । अवटः श्वभ्रं, निकाय्यः गेहम्, अयमाच्छादनपटः । उत्तरासङ्गः वस्त्रम्, नूपुरः हारः कलापः आभरणजातिः । राः धनं, कोशः निधिः, स्वः वित्तम्, अर्थः विभवः । चशब्दः पादपूरणार्थः ।

बहवश्च सक्तुबल्वजदारालाजाऽसुगृहा दशा वास्त्राः ।
नाड्यनआदि जनापः पराणि व्रणयुगपदाङ्गानि ॥२०॥

एते शब्दाः पुल्लिङ्गा भवन्ति । चशब्दाद्बहवश्च भवन्ति । इमे सक्तवः यवचूर्णः । इमे बल्वजाः वीरणरचितकटः । इमे दाराः भार्या । लाजा असु इति पृथक्पदकरणात्तत्पर्यायस्यापि पुंस्त्वं बहुत्वं च भवति । इमे लाजा अक्षताः, इमे असवः प्राणाः । इमे गृहा गेहम् । अर्द्धर्चादित्वादिदं गृहं गृहे गृहाणि । इमे दशाः वस्त्रस्यावयवभूताः । वास्त्रा इति किम् । इयं दशा वयोऽवस्था । नाडी–अनस्–आदि–जनाप इत्येतेभ्यः पराणि व्रण-युग-पद-अङ्ग-इत्येतानि नपुंसकानि सन्ति पुल्लिङ्गानि भवन्ति । नाडीव्रणः, अनोयुगः शकटयुगं, जनपदः देशः, अपाङ्गः कटाक्षः । एतत्पराणीति किम् ? । शिरोव्रणं शिरोव्रणः, कलियुगं, वस्त्रयुगम्, गोष्पदम्, आस्पदम्, उत्तमाङ्गं, वराङ्गम् । व्रणं व्रणः युगं पदमङ्गम् । रान्तं चेति चशब्दान्नपुंसकता युगादीनाम् ।

मलखलकपोलकम्बलचपालकल्लोलकालकीलगलाः ।
तरलप्रवालतण्डुलकललोपलतूलफालपूलनलाः ॥ २१ ॥

मलादयः शब्दाः पुल्लिङ्गा भवन्ति । अयं मलः प्रसिद्ध एव । खलः पिण्याकः । मलशब्दसाहचर्यात् खलशब्दो यः मलवाची स पुल्लिङ्गो भवति । अन्यार्थस्य तु यथाप्राप्तमेव लिङ्गं भवति । इदं खलं धान्यमर्द्दन-

भूमिः, अयं खलो दुर्जनः, कपोलः गण्डः, कम्बलः ऊर्णामयं प्रावरणं, चपालः यूपकटकं, कल्लोलः वीचिः, कालः मृत्य्वादिलक्षणः, कीलः कीलनद्रव्यं, गलः कण्ठः, तरलः हारमध्यमणिः, प्रवालः अङ्कुरः, तण्डुलः फलान्तः कणः, कललः शुक्रशोणितसमवायः, उपलः पाषाणः, तूलः अर्कादीनां फलान्तर्वस्तु, फालः अयोमयो गोलः, समन्ततो वृतः, पूलस्तृणसङ्घातः, नलः तृणविशेषः।

पुलिङ्गाधिकारः समाप्तः।

स्त्रीलिङ्गं योनिमतां प्राग्दीर्घान्त उदितोऽप्यनुक्त इह ।
द्रुहलिलिदंतदीधितिजात्याजिद्रदद्युविद्च्छर्द्दिः ॥ २२ ॥

स्त्रीलिङ्गमधिकृतं वेदितव्यमा विपक्कुलिशसंशब्दनादिति। योनिमताम्। योनिर्भगः तद्वतां प्राणिनां यदभिधानं तत् स्त्रीलिङ्गं भवति। इयं माता जननी, इयं स्वसा भगिनी, दुहिता सुता, ननान्दा भर्तृभगिनी, याता देवरभार्या, दनुर्दानवमाता, कद्रूः नागमाता, दितिर्दैत्यमाता, योषित् युवतिः, स्त्री भार्या, जाया पत्नी। प्राग्दीर्घान्तः। शब्दः प्राक् पूर्वस्मिन् उदितोऽपि कथितोप्यन्यलिङ्गः स्त्रीलिङ्गो भवति। इयं शमी शिंशपा रोहिणी। तरुविशेषत्वात्पुल्लिङ्गमुक्तम्। द्राक्षा तिन्तिडिका। फलजातित्वान्नपुंसकत्वं प्राप्तम्। मल्लिका मालती केतकी। कुसुमजातित्वादेषां नपुंसकत्वमुक्तम्। मक्षिका यूका पिपीलिका। प्राणित्वात्पुंस्त्वमुक्तम्। तथापि दीर्घान्तत्वादनेन स्त्रीत्वं भवति। अन्तशब्दग्रहणादनाम्नोपि दीर्घान्तस्य स्त्रीत्वं भवति। व्यावक्रोशी व्यावहारी व्यावचर्ची वर्त्तते। "कर्मव्यतिहारे णच् स्त्रियाम् (३-३-४३)" इति णच्। "णचः स्त्रियामञ्" (५-४-१४) इति तदन्तस्य "टिड्ढाणञ्० (४-१-१५)" इति ङीप्। गोत्रा गोसमूहः, रथकट्या, खलिनी। "इनित्रकट्यचश्च(४-२-५१)" इति समूहे प्रत्ययाः। अनुदितोऽपि। दया करुणा, लीला विलासः, माला स्रक्, इयं नौर्द्रोणी। द्यौः द्यावौ द्यावः इति गगनार्थो द्योशब्दो विद्यते। प्रागिति किम्?। कीलालपाः ग्रामणीः, यवलूः पुरुष इत्यादौ नित्यं स्त्रीत्वं माभूत्। अत्र हि वाच्यवदनेकलिङ्गार्थो भवति। वक्ष्यति तत्परं लक्षणमनेन न बाध्यते। अनुक्त इह द्रुहलिलिदन्त। इहास्मिन् लिङ्गानुशासने यः

न उक्तः अन्यलिङ्गः स द्रुशब्दान्तः हलन्त इदन्तः तिप्रत्ययान्तशब्दः स्त्रीलिङ्गो भवति। इयं दद्रुः त्वग्दोषः, शतद्रुः नदी। अनुक्त इति किम्?। हरिद्रुः तरुः, सितद्रुः अब्धिः, शतद्रुः नदः। हलन्तः। इयं त्विट् दीप्तिः, विप्रुट् शीकरः, समित् इध्मं, वीरुत् गुल्मम्। इदन्तः। रुचिः तेजः, धूलिः पांसुः, दर्विः पाकघट्टनी, वेदिः यागार्थं भूमिरचनाविशेषः, अहन्तिर्दानम्। तिप्। तल्-प्रत्ययान्तः। ग्रामता जनता। अनुक्त इति किम्?। अनड्वान् विपश्चित् सुकृत् कविः मुनिः हरिः गिरिः। अन्तशब्दग्रहणादियं भक्तिः कृतिः लब्धिः सिद्धिरित्यादि। प्राङ्ग्रहणनिवृत्त्यर्थमिह ग्रहणम्। तेन परत्रापि यन्नोक्तमन्यलिङ्गं तत् स्त्रीलिङ्गं भवति। अन्यथा अनेकलिङ्गार्थस्य स्त्रीत्वं प्राप्नोति। दीधितिः रश्मिः, जातिः कुसुमविशेषः, इयमाजिः रणम्, इयं दरत् हृदयम्, इयं द्यौः स्वर्गः गगनं च, इयं विट् पुरीषम्, इयं छर्दिः वान्तिः, छर्दिः……… भवति। वैश्यार्थस्तु पुल्लिङ्ग एव। अयं विट् वैश्यः।

भाद्वाःपूरुड्काकुप्रियङ्गुहृत्स्नायुरज्जुचञ्चुतनुः।
बहवश्च समासिकतावर्षाप्सुमनोजलौकसोऽप्सरसः॥ २३॥

एते भासादयः शब्दाः स्त्रीलिङ्गा भवन्ति। इयं भाः कान्तिः, इयं द्वाः द्वारम्, इयं पूः पुरम्, इयमुड्ः भम्। द्वार्पुरुड्शब्दानां नपुंसकत्वं प्राप्तम्। इयं काकुः उच्चारणविशेषः। हृद् हृदयं, स्नायुः शरीरान्तर्वेष्टः, रज्जुर्बन्धनद्रव्यं, चञ्चुः पक्षिणां तुण्डं, तनुः शरीरम्। उकारान्तत्वात्पुंस्त्वं प्राप्तम्। बहवश्च। इमाः समाः वर्षम्, इमाः सिकता वालुका, वर्षा ऋतुविशेषः, इमा आपः जलं, सुमनसो देवाः। बहव इति किम्?। सुमनः पुष्पम्। जलौकसः रक्ताकर्षप्राणी। अप्सरसः देवयोषित्। पृथगुपन्यासात् इयमप्सरा इत्येकवचनमपि।

इति स्त्रीलिङ्गाधिकारः समाप्तः।

विषकुलिशकलत्राणि त्रिविष्टपाभ्रे नपुंसके पर्व।
प्रसवाश्ववडववाक्छेदगरुदुच्चारवेधसः पुंसि॥ २४॥

एते विषादयः पुल्लिङ्गा भवन्ति। कुलिशं वज्रम्, इदं कलत्रं भार्या, त्रिविष्टपं स्वर्गः, अभ्रं मेघः। इदं पर्व। नान्तत्वात् पुंस्त्वं प्राप्तम्।

पञ्चादिपदाः। शालासेनासुरानिशाशब्दाः स्त्रीलिङ्गनपुंसकयोर्भवन्ति। गोशाला गोशालं, क्षत्रियसेना क्षत्रियसेनं, यवसुरा यवसुरं, भूतनिशा भूतनिशम्।

पुलिङ्गस्त्रीलिङ्गा मरीचिमणियष्टिमुष्टियोन्याणिः।
त्रुटिमपिपाटलिशाल्मलितरणिश्रोण्यूर्मयो वस्तिः॥२६॥

एते मरीच्यादयः शब्दाः पुल्लिङ्गाः स्त्रीलिङ्गाश्च भवन्ति। अयं मरीचिः इयं मरीचिः रश्मिः, अयं मणिः इयं मणिः माणिक्यम्, अयं यष्टिः इयं यष्टिः अवष्टम्भनदण्डः, इयं मुष्टिः अयं मुष्टिः अङ्गुलिसङ्कोचः, अयं योनिः इयं योनिः प्रसिद्ध एव, अयमाणिः शकटकीलिका, अयं त्रुटिः इयं त्रुटिः काललेशः, अयं मपिः इयं मपिः। एवं पाटलिः शाल्मलिः तरणिः श्रोणिः नितम्बः ऊर्मिः वस्तिः।

अरणीपुधीपुतिथयः समृत्यु कर्कन्धुबाहुकण्डु तथा।
संज्ञा बहुलं वाच्यवदशरन्नित्यं ह्यनेकलिङ्गार्थः॥ २७॥

अरण्यादयः शब्दाः पुल्लिङ्गस्त्रीलिङ्गा भवन्ति। अरणिः अग्निमन्थनकाष्ठम्। एवमिपुधिः भस्त्रा। क्वचित्त्वात्पुंस्त्वं प्राप्तम्। इपुः शरः। तिथिः प्रतिपदादिपु। कर्कन्धुबाहुकण्डुशब्दाः सह मृत्युशब्देनोभयलिङ्गा भवन्ति। अयं कर्कन्धुः बदरीकं दुःपाकस्थानं, बाहुर्भुजः, कण्डुर्गात्रघर्षणे। वाच्यवत्। वाच्यमभिधेयं यल्लिङ्गं संज्ञायाः तेन तुल्यं संज्ञाशब्दो बहुलं भवति। शरयुः·········। श्रीकण्ठो नाम देशः, मालवको नाम देशः, मथुरा नाम नगरी, कन्यकुब्जं नाम नगरम्। ···········शार्दूलविक्रीडितम्। उपचित्रकम्। पदचतुरुर्द्ध्वं नाम वृत्तम्। केषांचित् न भवति। वरेन्द्राः तीरभुक्तिर्नाम देशः। कौङ्कणं कश्मीरं नाम देशः। शालुकिनी लिङ्गापाढो नाम ग्रामः। नैलावटं श्रीभवनं नाम ग्रामः। मालिनी स्रग्धरा आपीडः पणव इति नाम वृत्तम्। क्वचिद्वचनव्यत्ययः। गोदौ नाम ह्रदौ तयोरदूरभवो ग्रामः गोदौ ग्रामः। पञ्चालो नाम देशः। खलतिकं नाम वनानि, खलतिकस्य पर्वतस्यादूरभवानि। क्वचिल्लिङ्गवचनव्यत्ययः। वरणानामदूरभवं नगरं वरणाः नगरम्। अशरन्नित्यं ह्यनेकलिङ्गार्थः। न एकमनेकं लिङ्गमर्थोऽभिधेयं यस्य शब्दस्य स वाच्यवद्भवति, नित्यं शरदं-

ब्राह्मणार्थं पक्वान्नमिति । प्रादि-अलम्-आपन्न-प्राप्त-पूर्वे च तत्पुरुषे वाच्यमिव लिङ्गं भवति । निर्गतः कौशाम्ब्याः निःकौशाम्बिः निःखट्वः, अतिनु काष्ठम् । परवल्लिङ्गं प्राप्तम् । अलं जीविकायै अलंजीविकः पुरुषः, आपन्नो जीविकाम् आपन्नजीविकः, एवं प्राप्तजीविकः ।

दृश्यन्तेऽर्द्धर्चाद्याः नपि पुंसि च शङ्खपद्ममम्भोजे ।
भूतो ग्रहेऽथ लवणे सैन्धवमित्यनुदितं जनाज्ज्ञेयम् ॥ ३० ॥

अर्द्धर्चप्रभृतयः शब्दाः नपि पुंसि च दृश्यन्ते । इदमर्द्धर्चम् । अर्द्धर्चः । अर्द्धमृच इति विगृह्य " ऋक्पूरब्धूःपथामानक्षे (५-४-७४) " अप्रत्यये कृते परवल्लिङ्गत्वं प्राप्तम् । एवं गोमयः कषायः कार्षापणः कुतपः कपाटं गृहः वज्रः अन्धकार इत्यादयः । दृशिग्रहणं प्रयोगानुस्मरणार्थम् । शङ्खपद्ममम्भोजे । शङ्खपद्मशब्दौ अम्भोजे जलजे वाच्ये नपुंसके पुंसि च भवतः । इदं शङ्खम्, अयं शङ्खः । इदं पद्मम्, अयं पद्मः । अम्भोज इति किम् ? । अयं शङ्खः अयं पद्मः निधिः । भूतो ग्रहे । भूतशब्दः ग्रहे पिशाचे वाच्ये उभयलिङ्गो भवति । इदं भूतम्, अयं भूतः पिशाचः । ग्रह इति किम् ? । एतानि भूतानि पृथिव्यादीनि । भूतः पुरुषः, भूता स्त्री, भूतं कुलम् । अथ लवणे सैन्धवम् । लवणेऽभिधेये सैन्धवमित्येतन्नाम उभयलिङ्गं भवति । इदं सैन्धवम्, अयं सैन्धवः, लवणम् । लवण इति किम् ? । सैन्धवः अश्वः, सैन्धवी स्त्री, सिन्धौ भवमिति विग्रहः । नित्यं पुल्लिङ्गानां यो नपुंसके प्रयोगो दृश्यते, यश्च नित्यं नपुंसकानां पुल्लिङ्गे प्रयोगो दृश्यते, स अर्द्धर्चादित्वाद्द्रष्टव्यः । इत्यनेन प्रकारेण यन्मया न उदितं न कथितं तज्जनाद्विशिष्टलोकात् ज्ञेयमवगन्तव्यमिति ।

व्याडिप्रणीतमथ वाररुचं सचान्द्रं
जैनेन्द्रलक्षणगतं विविधं तथाऽन्यत् ।
लिङ्गस्य लक्ष्म हि समस्य विशेषयुक्त-
मुक्तं मया परिमितं त्रिदशा इहार्याः ॥ ३१ ॥

APPENDIX II

INDEX OF PROPER NAMES IN VÂMANA'S LINGÂNUŚÂSANA

कान्यकुब्ज p. 18
कश्मीर p. 18
कौङ्कण p. 18
चन्द्र pp. 3 & 4
चान्द्र p. 20
जगत्तुङ्ग p. 6 l. 13
जैनेन्द्र p. 20
तीरभुक्ति p. 18
तैलावट p. 18
नन्द p. 7
पञ्चाल p. 18
पाणिनि p. 7
मथुरा p. 18
मालवक p. 18
लिङ्गपाटी p. 18
वरणा p. 18
वररुचि p. 2
वरेन्द्र p. 18
वामन p. 20
वाररुच p. 20
व्याडि pp. 2 & 20
शाङ्किनी p. 18
श्रीकण्ठ p. 18
श्रीभवन p 18

APPENDIX II

INDEX OF PROPER NAMES IN VÂMANA'S LINGÂNUŚASANA

कान्यकुब्ज p. 18
कश्मीर p. 18
कौङ्कण p. 18
चन्द्र pp. 3 & 4
चान्द्र p. 20
जगत्तुङ्ग p. 6 l. 13
जैनेन्द्र p. 20
तीरभुक्ति p. 18
तैलावट p. 18
नन्द p. 7
पञ्चाल p. 18
पाणिनि p. 7
मथुरा p. 18
मालवक p. 18
लिङ्गपाटी p. 18
वरणा p. 18
वररुचि p. 2
वरेन्द्र p. 18
वामन p. 20
वाररुच p. 20
व्याडि pp. 2 & 20
शाङ्किनी p. 18
श्रीकण्ठ p. 18